**क्रूरधूर्त्त** पु० क्रूरः कृष्णत्वात् तत्सदृशः धूर्त्तः। कृष्णधत्तूरके राजनि०

**क्रूरप्रसादन** त्रि० क्रूरमपि प्रसादयति प्र+सद+णिच्—ल्यु। भक्ते सेवके शब्दचि०। [राजनि० स्त्रियां ङीप्।

**क्रूरराविन्** पुंस्त्री० क्रूरमुग्रं रौति रु-णिनि। द्रोणकाके

**क्रूरलोचन** पु० क्रूरं लोचनमस्य। शनिग्रहे हारा० तद्दृष्ट्याहिंसकत्वात् तस्य तथात्वम्। यथा च तद्दृष्ट्या घातकत्वं तथा दृभाननशब्दे ८८१पृ० उक्तम्

**क्रूराकृति** त्रि० क्रूरा आकृतिर्यस्य। १कठिनमूर्त्तिके २रावणे पु० शब्दमा०। कर्म्म०। ३कठिनायां मूर्त्तौ स्त्री

**क्रेङ्कित** न० क्रेङ्केत्यव्यक्तं शब्दं करोति णिच्—भावे क्त। क्रेङ्केत्यव्यक्तशब्दभाषणे "निरुध्यमाना चक्रेण चक्री क्रेङ्कितभाषणैः" काशीख०

**क्रेणि** त्रि० क्री—नि। क्रेतरि—शस्यक्रेणिः उज्ज्वलद०

**क्रेय** त्रि० क्री—कर्म्मणि यत्। क्रेतव्ये अमरः

**क्रैडिन** त्रि० क्रीडी मरुत् देवताऽस्य अण् वेदे नि० नलोपाभावः। क्रीडिदैवत्ये साकमेधीये तृतीयाहे प्रातःसवनिके अण्डद्वयशिश्नरूपे हविषि। "शिश्नान्येवास्य क्रैडिनं हविः शिश्नैर्हि क्रीडतीवायमेवावाङ् प्राणः" शत० ११,५,२,४ "अण्डौ लिङ्गं चेति त्रीणि शिश्नानि" भा० "तृतीयेऽहन्युपांश्वन्तर्यामौ हुत्वा पौर्णादर्व्यं प्रातः सवनिकेषु क्रैडिनम्" आश्व० श्रौ० ८।२।१५ तद्द्रव्यमधिकृत्य इष्टिः छ। क्रैडिनीया इष्टिभेदे सा च इष्टिः कात्या० श्रौ० ५,७,१ सूत्रादौ दर्शिता। तस्याः पद्धतिश्च संक्षेपेण कर्कभाष्ये दर्शिता यथा

"अथ क्रैडिनीया द्विहविष्केष्टिरुच्यते तत्र मरुद्भ्यः क्रीडिभ्यः सप्तकपालः, अदित्यै चरुः, इमे हविषी समानतन्त्रे भवतः प्रतीष्य्युद्धरणपक्षे क्रैडिन्यादित्येष्ट्यर्थमिध्य्युद्धरणे क्रैडिन्यादित्येष्टिभ्यामहं यक्ष्ये इति। वरणे पात्रासादने सप्तकपालानि एका चरुस्थाली, दक्षिणा अन्वाहार्यः शतावदानानन्तरम्, मेक्षणम् विंशतिरिध्मकाष्ठानि पुरोडाशपात्रेका अन्यत्सर्वं प्रकृतिवत्। ग्रहणे मरुद्भ्यः क्रीडिभ्यो जुष्टम्, अदित्यै जुष्टम्। प्रोक्षणे मरुद्भ्यः क्रीडिभ्यस्त्वा जुष्टम् अदित्यै त्वा जुष्टम्। नानावीजपक्षे तद्धर्मा उक्ताः एकवीजपक्षे करणान्ते विभज्यालम्भः इदं मरुतां क्रीडिनाम्, इदमदित्याः। प्राणदाने मरुतः क्रीडिनो गच्छ, अदितिं गच्छ, सप्तदशेन वज्रेणेत्यत्रबाधने। उत्तमप्रयाजे इदमग्नये सोमाय मरुद्भ्यः क्रीडिभ्योऽदित्यै देवेभ्य इत्यादि। प्रधानयागे मरुद्भ्यः क्रीडिभ्योऽनुब्रूहि मरुतः क्रीडिनो यज इदं मरुद्भ्यः क्रीडिभ्यः, अदित्या अनुब्रूहि अदितिं यज इदमदित्यै, मेक्षणेन चरोरवदानम्। स्विष्टकृदादि पुरोडाशस्य प्राशित्रेडाव्यतिरिक्तं न भवति चरोस्तु सर्वं भवत्येव। व्यूहने मरुतां क्रीडिनामदित्या उज्जितिम् मरुतः क्रीडिनोऽदितिस्तमपनुदन्तु। प्रस्तरहोमे इदमग्नये सोमाय मरुद्भ्यः क्रीडिभ्योऽदित्यै देवेभ्य इति। अन्यत्कर्मापवर्गान्तं प्रकृतिवत् इति"

**क्रैव्य** पु० क्रिवीणां पञ्चालानां राजा वा० ञ्य। क्रिविदेश राजभेदे क्रिविशब्दे उदा०

**क्रौञ्च** पु० क्रुञ्च अच् वा० गुणः। "कैलासे धनदावासे क्रौञ्चः क्रौञ्चोऽभिधीयते" इति हड्डारावल्युक्ते क्रौञ्चपर्व्वते क्रौञ्चदारणः कार्त्तिकेयः इति रायमुकुटः

**क्रोड** पुंस्त्री० क्रुड—घनीभावे संज्ञायां वञ्। १सूकरे "क्रोडकुलदश्यमानभद्रमुस्तारसामोदः" काद० "नदी सैवालदिग्धाङ्गं हरिश्मश्रुजटाधरम्। लग्नौ शकुनखैर्गात्रैः क्रोडैस्त्रिवैरिवार्पितम्" भा० अनु० ५० अ०। २भुजयोरन्तरे (कोल) न० स्त्री० अमरः "कुपितकपिकपोलक्रोडताम्रस्तमांसि" उद्भटः ३वृक्षकोटरे "हा हा हन्त तथापि जन्मविटपिक्रोडे मनोधावति" उद्भटः। घनीभूते ४वक्षोमध्यभागे पु० "इन्द्रस्य क्रोडोऽदित्यै पाजस्यम्" यजु० २५,८ "क्रोडस्य घनीभूतवक्षोमध्यभागपरता वेददीपे उक्ता। क्रोडं तु वक्षोभुजान्तरे देहांशभेदः। "हृदयं जिह्वां क्रोडं सव्यसक्थि पूर्वनडकं पार्श्वे यकृत् वृक्कौ गुदमध्यं दक्षिणा श्रोणिरिति जौहवानि" कात्या० श्रौतसू० ६,७,६ "क्रोडं वक्षोभुजान्तरम्" कर्कः "शेषमिडापात्र्यामासिच्य क्रोडमनस्थीनि च प्रास्यति श्रोणि वर्ज्जम्" कात्या० श्रौतसू० ६,८,१२,। ५अश्वानामुरसि ६उत्तरस्थग्रामभेदे शब्दचि० ७वाराहीकन्दे पु० राजनि० ८शनिग्रहे पु० मेदिनिः

**क्रोडकन्या** क्रोडस्य शूकरस्य कन्येव प्रियत्वात्। वाराहीकन्दे राजनि०। [ (वड थुलकुडि) राजनि०

**क्रोडचूडा** स्त्री क्रोडे चूडा यस्याः। महाश्रावणिकावृक्षे

**क्रोडपत्र** न० क्रोडे उपचारात् मध्ये स्थितं पत्रम् ७त०। ग्रन्थलेखने भ्रमात् त्रुटितग्रन्थस्य परिपूरणाय ग्रन्थस्थपत्रयोर्मध्ये चिह्नविशेषेण लिखित्वा स्थापिते पत्रे।

**क्रोडपर्णी** क्रोडे कण्टकमध्ये पर्णं यस्याः गौरा० ङीष्। कण्टकारिकायाम् शब्दच०